त्वेन साम्यात् प्रथमे तु वरगान्नित्यसिद्धया पेऽञ्च । अचो दीर्घश्चेति लुप्तनकारनिर्देशात् पूजायां संग्रहः । इत्याशयेना
ह । नलोपे न तूत्यादि अञ्चेरिति पाठे तु ज्ञापकासंभवः । इकः । किं तेन सर्वथाप्येवं नलोपात् उच्चारणार्थः इकारः इत्या
शाश्रयणेऽनुभवत्यपि । पूर्वस्येति शसादाविति । परसप्तम्या निमित्तत्वे पूर्वलाभः । न च चकारेणाव्यवधानेनेति वाच्यं यत्न
नाव्यवधानं तेन व्यवहितेऽपि इति वचनप्रामाण्यात् । चकारैकवर्णव्यवधानेऽपि भवत्येव । अकृतव्यूहपरिभाषया पूर्वेण यत्न
तिरश्चादयः इति ननु मा सूत्रनिपातनेऽञ्चतौ वहादेः सादिरिति सूत्रेणाति घ्यादेशः प्राप्तः नुम्लोपनिमित्ताभावेनेमि
मित्तिकाभावादेव रूपसिद्धिरिति चेत् सत्यम् अञ्चतिनिमित्ते प्येकदेशविकृतन्यायेन तत्सत्त्वान्निमित्ताभावकृताभावः
तिरश्चादिरिति युक्तं तिरश्च उदीच इति शब्दप्रवृत्तिदर्शनात् तृतीयस्यादर्शनात् बहुवचनमयोग्यमिति दृष्टा । ऋत इति एतत्
दीर्घं तु दीर्घग्रहणान्तसंज्ञापूर्वको विधिरनित्य इति अतो दीर्घत्वेन । अमुमुयङ् इति अमुमञ्चतीति वाक्ये क्विपि अदस्
अम अमू क्विप् इति स्थिते नोलोप इति न लोपेऽकारौरत्वाल्लोपे वेरिवेर्लोपे समासप्रत्ययोरित्यस्य लोपेनाम संज्ञा
यां स्यादौ अदसोऽसेर्दादु दो म इति । अदद्र्यादेशमते तु नुमागमे सिलोपे च लोपेन स्यात् । त्वे रूपसिद्धिः । अदमुयङ् अदद्र्यङ्
इति विकल्पस्तु इत्थं उभयत्र मुत्वमलत्ववत् तया च कौलक्ष्यात् इत्यत्र लतद्देश्यम् इत्यत्र अन्त्यस्य दसेति व्यारव्या

इति केचित् अपभ्रंशा एवैते इति हीहिता: रामान्मास्त' अमुकशब्दोऽप्रयुक्त इत्यन्ने नामवृत्तिविषये प्रयुज्यते ।
केवलस्य तु अदकसशब्दस्यैव प्रयोग: अमुक इत्येकवचनेन यदि शिष्टप्रयोगस्तदा साधुर्नो चेदसाधुरेव अ
मुकशब्दस्य प्र वृत्तिविषये प्रयोगाभ्युपगमादुक्त: एवेतिय द्यपि सामान्ये तृस: क: स्यादिवच्चेति सुप्त्या द्वितत्
याऽपितस्य प्रयोग: समास एव न तन्यत्रेत्याहु: ननेदमवधेयं इत्यं हि महानिबन्धानामविवाख्यानाच्चगतो स
त्यानाप्रामाण्यमापादनीयमिति स्वोत्प्रेक्षित प्रयोगत्वनिश्चये पुनर्यदि शिष्टप्रयोग स्यादि तर्श योन्निर्यंदेहेति
माच्छ इति मात्र उ ऊ इति च्छेद: समाहारे ह्रस्वत्वापत्ते यद्वा स्त समाहार: ह्रस्वत्वस्य तु संज्ञापूर्वकत्वाद्दनित्यताम्
आहु: माद् इति पंचमीनिर्देशात्पर: स्यात् नील भवति सवहस: स्वरस्य माम्परे स्य हसस्यासंभवात् स्वर एव गृह्यते इ
ति न त्वेदमवधेयं अमुमुयड् इत्यत्र मात्परस्य रेफरूपहसस्य उक्तदर्शनात् हसस्यासंभवात्स्वर एव गृह्यते इत्युक्ति:
निर्मूला तथा चोक्तं दीक्षिते: ह्रस्वव्यंजनयोर्ह्रस्वो दीर्घस्य तु दीर्घ: इति व्यंजनस्य इति व्यंजनस्यासंभवे कथं इदं से
गच्छते इति परिहृतत्वे इति बहुत्वे के अमुया: एक वि अमू न अहं तर्कि इमे ॥ ॥ श्रीरामकरपात्रेणालोकेप्रा
कर सर्मणा कृतायामिह टीकायां पुल्लिंगो गाहसान्तक: नहो ध इति तत्पदा नमन्य न मस्क नोक्त: नहे इत्यस्या
सिद्धे: उपानहिति उपपूर्वान्नहे: क्विपि नहि वृति इत्यादिना पूर्वस्याल्ले अत्रेद विभाव्य सुष्ठु अन इ याहो ऽ स्यामिति
बहुव्रीहौ त्वनड् याम्नित्यैव ननु नदादित्वात् ङीप् स्वनड्वाहीति ॥ अनुपसर्जनाद् इति तन्निषेधात् उष्णिगिति उत्
पूर्वात् स्निह प्रीतावित्यस्मात् क्विपि निपातनात् ह्रुलोप षत्वे गीरिति गृणाति उर्त्त रेलशब्दे चेति क्विपि [illegible] इति निर्देशे

अत्रवसङ्कसो: सामान्यग्रहणं प्रकानुबन्धकग्रहणे अननुबन्धकग्रहणेनेतिपरिभाषात्वेनेहाश्रीयते उकारसहितस्य
विधानात् तथाहि विदेर्वावसुरितिसूत्रेणशतुर्वसुरादेशोविधीयते तत्र स्थानिनः शतुः ऋदित्वादेवत्रित्कार्यसिद्धेः पुनरा
देशेउदित्करणंअर्थमितिज्ञापयति। वसुग्रहणेनकृतेरणिग्रहणं पयास्यानइति अञ्चोतिस्त्वथाच्छुसा हुगितिलभ्यतेतत्रा
हिशब्दः प्रकारेतेनयादिग्रहणापीत्याह। नहिनेत्यादि पुंसो: सुङ् इति अञ्चनसमहनइत्यत: सिंहावलोकनेनशेवेत्य
पकृष्यते। सोनः पुंस। इत्यतोमङक सूत्रन्यायेन पुंसइत्यनुवर्तते। उकारस्तूच्चारणार्थः पुंसोनुमसुन्निति प्रत्ययादि
त्वेननुमसिद्धे: पुंस: पुमान्निति सिद्धे असुङ्करणमन्यत्रापिविधानार्थं तेनतत्राशब्दोपिसिद्ध्येत् मइति संयोगान्तस्य
लोपेनस्यानुस्वार: नुमविसर्गोनिनयत्व। नुमस्थानिकानुस्वारस्येवग्रहणात् उशनसामिति बहुवचनमाद्यार्थ। अ
त्रकु: उशनेत्यत्रसंज्ञापूर्वकत्वान्नेविभाषा इतिदीर्घोनेति। अत्रेदमवधेयं इयंशकाटिलोपङ्केनेक्रमागनाच्यस्यअना
न्तत्वाभावात् भाष्ये अदर्शनात् द्वितीयेपिनान्तसनान्तइतिव्याख्यानात् तत्रनित्यमितिसम्बन्धात् नित्यंनान्तइति लाभात्
शक्नेतदभावाद्वैवेनेतिविचार: धोसइति अनन्तदादेश्चेतिसूत्रानन्तदादेरित्यस्यानुवृत्तेर्विवरणंत्यदादेदस्येत्यर्थाचितेनत
दसइतिपरिनुन्यदादेरदसइतिव्याख्यायतेनत्यानदोष: त्यदादेःकिं। वेद: नेद: दस्यकिं। य: सोकिं। अमूभि: सहेत्यकारस्यहि
तत्वान्नान्तस्य। सराविति न नुक्तिग्रामकारान्तस्यासकावितिकयंकाप्यतइतिचेन भावित्वाम्मितिचेन सत्यम। इ: शोः
हित्यनन्तरे: इत्वाहिलोपच्चपसिद्ध अन्वेनानुक्तेतस्यव्यवस्थितत्वाभ्युपगमात् साकादस: सेरौत्ववा उत्वाभावेदु
त्वेच अमुक: नम[illegible]अपतितेस्यतऋहणेनग्रहणात् साकस्यापित्यादादिकार्यके चं अमुकगोत्रस्यामुकशर्मणा

वानुविधिरित्येवंसिद्धेरितिदिक्‌ तइत्यनुमहावपिविभाज्ञि परिणामल्केशनिवृत्त्यर्थं हद्ग्रहणं आशिवाविर
आशास्त:क्रावुपधायाइतिइत्वेघसोहेरितित्वं॥ ॥श्रीविद्यानगरस्थायिल्लोकेशकरशर्मणा वि
हितायांहिटीकायांस्त्रीलिंगागाहसान्तक: अक्ऋइति त्यादिविसर्गइत्यतोविसर्गइत्यनुवर्तते॰कत्रि
नुसस्तावित्यत:समनुवर्त्यतेमेवबाधितत्वात्तन्निरामास्थम:तस्यापिविसर्गविधानोवश्यत्वेनविसर्ग
विधानस्यवैचित्यत्वात्‌ यस्त्वत्र॰ सस्यैवस्यवाहितत्वेन तदनुवृत्ते रवाचित्यं तस्यभावात्‌ दीर्घान्तहानि
यस्मिन्निहाधेहातिविग्रहे दीर्घाहन्नामसइतिस्थिते॰ हसपदनिमित्ता येनोपधाया इति दीर्घे पश्चात्‌ ऋइतिवि
सर्गे दीर्घाहा:धोत्वधाविविति निवृत्तेधाहीर्घाभावेविसर्ग एव हदीर्घाह:ऋतुनजीतिनरजानांसंयोग:शो
नुमेति वानुवृत्ते र्व्यवस्थितत्वादितिभाव:॥गवाकशब्दस्येत्यादि॥ अचोगतीत्यादि॥ अचोपूजागतिर्गम
नतयोर्भेदस्तस्मात्‌ अन्तधूगागमालोपेरिति गोर्वा॰ गोरग्वेति विकल्पहद्वैरूपव्रयमितिभाव:स्यम
सुपस्वितिप्रत्येकनवनवत्यर्थ:भादविवितिभकारादावित्यर्थ:तथाहि॰ सोगन्त्यर्थतायान्नलोपेऽवहद्वौपु
अन्तध्वगागमे चपूर्वोपगात्‌ रूपत्रयं तेऽवववावसानइतिकगयोर्विकल्पाद्रूपषट्कं॰ पूजायत्नायान्नसध्वादि
विकल्पेनरूपत्रयमितिसंकल्नेनयानव॰ एवमस्यापि ड्वेहयेनगत्यर्थतोप्राञ्चचोदीर्घ:इत्यकारलोपेन
निमित्तासध्वादिरूपद्वयाभावादेकमेव पूजायनायोनुनलोपाभावादल्लोपस्याभावेऽसध्वादिविकल्प

योर्विंतसेइतिदीर्घः हरिति पूपालनहरणयोः पोहरित्सूर्त्वं इयंहिंर्यामिति अत्रापिस्तुयामितिग्रहणात्सुकिन
नेनिमित्तं इत्यस्यनित्यत्वाल्लिंगं अन्यथाइदमित्यत्रसेरभावादेवाप्राप्तौक्रियांग्रहणमनर्थकंस्यात् भिदि
पाइति भिद्म्यपाइतिच्छेदः बहुवचनंचिंत्यं सुकुत्रापोयस्मिन्ननत्स्वापू स्वाभ्यांइत्यत्रैपरत्वात्यात्व
योतनायस्वपिन स्ववसत्ववस मासोवैदिकानांसंग्रहार्थमाचार्यवक्रुवचनमितिमाधवः नन्वितिरामा
श्रम अत्रलौकिकप्रयोगनिष्पत्तिप्रयोजकत्वेनवैदिकप्रपाठनस्यायुक्तत्वात् अन्यथान्येषामपिव्युत्पाद
नप्रसंगात् लौकिकप्रयोगनिष्पन्नयेइतिमूलविरोधश्चेत्याचक्षते अत्रेदमवधेयं संकोचमानाभावात्लौ
किकानामेवव्युत्पाद्यत्वमितिन नहिवैदिकव्युत्पादनेयवनभाषायामिवापराधः यदपिअन्यथेत्या
दितत्रापिदेवासः देवेभिः गोनामित्यादीनांव्युत्पादनदर्शनात् कथंनव्युत्पाद्यत्वं यदपिलौकिकप्र
योगनिष्पन्नयेइतिमूलविरोधश्चेतितत्रापिनस्त्रापदनवाप्रवपदंवैदिकव्यवच्छेदकंदृष्टमस्तिनचा
लौकिकपदाद्वैदिकनिरासः इतिवाच्यं लौकिकानांबहूनामव्युत्पादनेनतद्ग्रहणस्यैवानुचितस्यात् छ
त्रिणागच्छंतीतिवत् यदिमाधवमतखंडनेआग्रहएवतदन्यस्याप्रिनिर्देशप्रयमुक्तेविपरीतनिर्दे
शादन्यत्रापिइतिवैदिकानांसिद्धिः वसन्तलक भ्यपादितिसूत्रगणेलाघवात्वैदिकानामुच्छृंखलीह

न्नित्वत्वेलब्धेपिअटीपोराटीपोरितिसंदेहनिरासार्थमित्यग्रहणं सयङ्·तस्येति सस्य यङ्·सयङ्·त
वैतौयस्यतस्येतस्येत्यर्थः एतन्मूलेनुप्रनुवर्तितवाग्रहणस्यव्यवस्थितत्वं।। ।।श्रीविद्यानगरस्थायिलोकेश
करधर्मिणा ।।कृतायामिहटीकायाम्‌लिंगोरसातके·।। ।। ।।त्वमहंसिनेति· त्वम् अहम् सिनाइति
छेदः सिनेतिसहयोगेतृतीया· त्वमहंसाविनुनोक्तं तइतिसकारस्यषोपरे प्रनिवार्यत्वात् उच्चारणस्यतु
नसामर्थ्यं तस्यप्रतित्वमितिगौणत्वचरितार्थत्वात् अत्राहुः अत्रसाविन्युक्ते क्रियायांत्वदाद्येत्वेपरत्वात्टाप्
म्भोविस्याद्वाधित्वाट्टाप् स्यादितितन्निरासायेति अत्रेदमवधेयं युष्मदस्मदोरलिंगत्वान्नत्वाभावाद
वापानिर्दिष्टेस्तन्निवृत्त्यर्थंत्वंनस्यव्यर्थत्वात् अत्रयलिंगयोगात्तियुष्मदस्मदोरलिंगत्वेतर्हि अस्मिन्प्र
येयुष्मदस्मदोर्नीतसंख्यावाचिनांचालिंगत्वमेवस्वीकृतमितिस्वोक्तयाविरोधः तयोरन्यवाच्यलिंगत्वा
त्रिष्वपिलिंगेषुसमानंरूपंज्ञेयमितिवदताद्यन्तिकारेणापिमहान्नविरोधस्त्ववाच्यलिंगत्वादित्येकं पदम
चस्यवाच्यलिंगमिववाच्यलिंगेयथेपरेनयाभावस्तत्वान्यथवरालिंगत्वादित्याचार्यवर्णायोद्धस्त्वविरो
धएवेत्युक्तेहिते युवावोद्विवचनइति इहत्यदादेष्टारत्यतः स्यादावित्यनुवर्त्यते वक्तीतिवचनं
कर्तरि युः द्वयोरर्थयोरिर्वचनेद्विवचनेअयमान्तनयावीद्विवचनेयुष्मदस्मदोइतिहरदत्तादिमतमनया

नन्वपत्र यं संकुलनयापत्येकं रूपचतुष्टयं एवं टाप्रभृतौ स्वरादौ सर्वत्र प्रत्येकं रूपचतुष्टयं बोध्यं जश्शसो स्के· गमः
थनायांतलोके पि पुनर्नुमाविप्राणां विशेषाभावात् प्रत्येकं तत्रापव· भामोदात्तुञ्जीरिण प्रत्यौयांमिति षट्षष्ट्· सुप
नुपज्ञायेनाधौ· प्रासङ्गा:· कुकुकाविति कुंचिकस्येनव्य· गतौ तु त्रयमेवेतिनव· कुकूपदत्प्रासे च पस्योतोवकल्पय
दिरकारस्तदानूपत्रयोधिकं भवत्येव· गदिपो:शानुरिति· वाम्ब्रात् ईयोरिति छेद: प्रादितिपंचमीनन्तपरतो॥ इत्थ
ईयचईयोनयो: ईय: इत्यत्र जवाभावेन उत्तरपदस्यान्तर्वर्तिविभक्त्यापदत्वेनेति ज्ञापितं तेन पूरमवाचाविन्यादौ कु
त्वाद्यभाव:· ऋदीपोराहीपोरिनिवृ नच्छेद:· उत्तरस्त्रेणनित्यग्रहणासामर्थ्यात् प्रयत्नुहत्वं नित्यप्रावरणोस्यादेइत्य
नेनलोपेकपमात्परत्वमिति चेत्सत्यं प्रत्ययलक्षणत्वेनेति गृहाण प्रभृतीन्यत्रातिव्याप्तिरिति चेन्न· लुकिनतन्नि
मित्तमितिनिषेधात् प्रत्ययकथमाङ्ग्रहणेन सानुबंधककृत्याद्यवर्णसामान्यग्रहणानिरनुबंधकग्रहणेन सानु
बंधकस्य प्रर्थवद्ग्रहणेनानर्थकस्य प्रत्ययाप्रत्यययो: प्रत्ययस्यैवेति परिभाषारूपेणनिषेधात् इतिवाच्यं· प्रण्णापं
नित्यविधानेन च परिभाषात्रयस्याप्रवृत्तिज्ञापकात् नच्चान्यथाप्याभ्यामनेनविकल्प:· प्राप्तायेन नित्यमित्यद्य
वद्भवत इयकरणात् सानुबंधकग्रहणेनेनरनुबंन्धकग्रहणानेति· ज्ञापनाच्च प्रपयारात्कृतमिति प्रयच पस्य प्र
यपोतयो:· प्रपयारात् प्रच्यपोरिनिवक्रव्येनवाकरणे तत्पंकपकारेङ्क· चिदन्तर्वर्तिविभक्त्यापदत्वेनेत्यस्य
नैनवद्व्यामित्यवसारसेहत्यनेन परत्वेन प्रव्याप्तिन्यमितिनसुवचम्मादित्यस्यानुवृत्ते:· आरम्भसामर्थ्या

वेति इति सप्तमंते दत्वाचैतौनेनत्वादयौतीत्यादि सिद्धे तवपुत्रस्त्वत्पुत्र इत्यादौत्वभवत्येव एकत्वाविधानस्याभि
मित्रस्य सत्वात् अत्राहुः युवयोः युष्मो युष्मत्पुत्र इत्यत्रैवस्याद्यभावात् एकमति वाच्यम् नुधातोरित्यत्रास
भवात्स्याद्यधिकारस्त्यक्तः सोऽपि न संबध्यते अतएव त्यदादेष्टेरत्वस्यादाविभक्तावुक्तः स्यादिग्रहणं कृत
मिति । अत्र इदं वक्तव्यं त्वन्मदेकत्वे युवावौ द्विवचने इत्यत्र योहं येरपि नुधातो त्यदादेष्टेरिति सूत्रद्वयमे
धस्यत्वाविशेषणाकार्यमेकस्मिन् स्यादिर्बाधोऽपरत्रेनेति व्याख्याने संगच्छते विनिगमनाविरहात् किंतु द्वित्वे
इति वक्तव्ये वचने इत्यस्य ग्रहणसामर्थ्यात् अस्यादियोग इति समाधेयं यूयवयौ जसि । अत्र युष्मभ्यमिति वृद्धैरद्रः नत्व
नि युष्माभ्यामति युष्मानत्रावकेन गोरात्वेत्यदाद्यत्वाभावादिति चेन्सत्यम् केचित्तावद्विव्यजयोगविभागेन
परेत्वाम् स्भाविस्याव भक्तिकनिर्देशेन सार्वः पराबालशनिर्दिष्टानकारोतस्तस्मिन्न परे व्यात्वे । अत्र युष्मद
शेनात्वादेशः द्वेतु द्वन्द्वस्य प्रयोजनाभावात् युष्मास्म युष्मामसामित्यसिद्धस्तूपपादिता । एटाद्यौरिति अ
त्रेरित्यनुवर्तते स्त्र्याविधौ त्वपासिद्धे नित्यत्वाप्रतिपत्तेःकृत्वाच्छादावव प्रसक्तेस्त्यदाद्यत्वाभावः अत्राहुः
युष्मदस्मदोरन्यतरस्याः किंपि युष्मस्मस्म आइतिस्थिते टेरेत्वकृते मयाश्रयाइति प्राप्नोति । युष्मास्मस्माइ
तिचेष्यतेसत्यम् यकारोऽप्यनेन विधीयतेलत्वानुसारात्स्थूयस्या अतएव हस्तस्य यत्व मपर्योर्वसेलाप इत्यने
नैव ज्ञापितमवचनेनलुप्तोत्र यइति । अत्रेदं नत्व । अत्रापि टेरत्व प्रतिनिर्देकर्तव्या । अस्पृतादेशएव सवत्स्यदा द्युत्वे
कृतेषकारस्त्वान नित्यत्वेनसमानमुभयोरपि तथा च युष्मस्मास्मस्यत्वे अयादयोलोपश्चावेत्यत्रवा इत्यस्याव्य

रित्यधारक्लेश: कृमेरिापुउितिपदेतनुद्विवचनेइतिसन्नम्यतम द्वित्वेइत्यर्थकंतद्वाचिनोरित्यर्थ: युष्माङ्:
द्वित्वेयास्मादिर्विकल्पस्यामित्यर्थ: अत्रेदवक्तव्यं एवंसतियुष्मामावांवातिकान्तानतियुवान् अत्यावान्
इत्यत्राव्याप्ति: द्वित्वाविधायिस्याद्यभावात् आमावेति अन्मूउौदुतिच्छेद: युष्मदस्मदोराकारान्तादेश:
औकारस्याम्भवतीत्यर्थ: एवंचयुष्मयते: क्विपितल्लोपेऔकारस्यामियुष्मामस्मामिति प्राप्नोति युष्मामस्मा
मितिचेष्यते एवंवमस्याल्लरूपसिद्धिरित्याह अत्ररामात्रम: मनात्रविधानेनैवत्वसिद्ध: रकारोव्यर्थ: इत्यत्रा
स्वमतमङ्क्रवान् अङ्गम उौड्तिच्छेद: अइतियोग: विभज्यते अमश्चलोप: अत्रयुष्मदस्मदोरित्यतस्तुर्वमनुवर्त्त
तथाच युष्मदस्मदोरकारोनादेश: स्यात् तस्याप्तत: परस्यलोप: स्यात् यस्यतुयुष्मदस्मदोरपर: औकारभव
तिआमस्मावित्यात्वे सवर्णदीर्घ: इतिवादीर्घत्वे अभ्यासोरस्योतिलत्व अकाकारोच्चारणमात्मर्थामिति अ
येदमवधेयं अइतिद्विर्त्वाद्योगविभागलोपाद्यनुवृत्तिवक्तव्या युष्मामस्मामितिरूपेसाधयन्नधिकक्लेशात्या
आधिकक्लेश: कुत्र आम् उौयुष्मदस्मदापरउौकारोअम्भवति सतितस्मिन्नतयोरकारान्नादेशइति अ
न्यमताम् स्मावित्यनेनैवात्व एवंचातिप्रसंगशंकापिनेति न मात्रविधानेसूत्रप्रसंगोद्भावननिराकरण
यन्नक्लेशानेतिविभाव्यंसूरिभि: यूयंवयंजसेति जसीतिपूर्वोक्तयुक्तेर्नक्लतेजसेतित्यस्यबहने: तत्वन्मद
कत्वेइति त्वदमदूएकत्वेइतिच्छेद: अमेअमावेत्यत्रवाशब्दस्यव्यवस्थितत्वात क्वचित्त्वसानामपिअमाभ

श्री
त·दी
४६

पिसर्गादिकार्यत्वाभावात्वेप्रह्रते अन्यथाम्ब्रकारान्तादेशेन रूपाणां नत्वात्त्वाऽऽदिप्रयासेन पर्यकः सं प्रह्णातैः नतु
कं निर्देशस्तु आम्‌ आदेशस्यस्यानिरङ्गत्वे नाम्ह्नत्वमाभिन्यपक्ष्यादपि स्तु स्यादिति तान्निमृत्वये अ
श्रयमेयाम्रग्रमेस्यानिरङ्गावज्ञापकः त्वन्मदकत्वेयुवावौहिप्च चेनेशनिरूपं हूयेपि एकत्वेहि वचनग्रहो
नप्रत्ययपरौकिंत्वपरोइति व्याख्यानकृत हर्शयति॥ समस्यमाने इत्यादि एवकेनामार्थे इति पदसंख्या
यामपिनामार्थत्वादितिभावः त्विकपदेनद्वेकार्यवाचिनीइति पाठ्य॥ संख्यायामपि भक्तपदे पि
रत्वेय स्पनामार्थत्वाने पाम्रात् अन्य सरव्य अक्षिति। युष्मदस्मदर्थगत संख्येतर संख्यापुक्त आदिन्तः
र्थः समस्यमाने युष्मदस्मदी द्वेकत्ववाचिनीचेत् समासार्थ अन्य सरव्य अत्र तदा युवावौ त्वन्मदावपि भवा
इत्यर्थः तयोरिति युष्मदस्मदोद्वेकत्वार्थत्वात् हित्वार्थत्वे कत्वार्थत्वाभावादित्यर्थः संकलितार्थत्वयः
यदावाक्ये युष्मदस्मदी एकत्वेन तान्त्वन्मतादेशाभवतः त्वन्मदेकत्व इति इतिसूत्रे युष्मदोरेकत्वाभि
धानस्याप्तत्वात्. यदावाक्ये युष्मदस्मदी हित्वेन तदा युवावौ भवतः एवं युष्मदस्मदोर्हित्वाविधायित्वात्
महान्तवाक्ये युष्मदस्मदी वक्रार्थ समासार्थो हित्ववाचीवा तदा युष्मदस्मदौ हित्वार्थत्वे कत्वार्थत्वाभा
वान्नयुवावौ नत्वन्मदौ॥ युष्मदस्मदोः षष्ठीवतुर्थी द्वितीयाभिस्तमम्‌ नौ वस्नसावित्यत्र व्या
ख्यानादेवकार्यस्यकार्यात्र्यर्थस्य द्विर्थो वक्तुर्थस्यवक्तृ यि इति य आक्रमं नन्वर्थतानापि शङ्कृतः॥

राम
४६

यस्थितत्वात् यो: सम्बन्धिनोऽवर्णस्य क्वचिल्लोप इति अल्लोपे रूपसिद्धिः एवं च युष्मास्त्रस्येति सिद्धं यत्त्वापि
तवचनेन लुप्तयकारनिर्देशः प्रक्लेशो नोचितः किंचास्तन्न पत्वं हसस्य यत्वमिति व्याख्याने एकस्मिन्नेव प्रयोगे
हस्य यत्वं मस्य कत्वं केन भाव्यं तदा द्वयोर्नैतिच तन्नित्यत्वापत्तिः प्रोक्तत्वात् द्वावेव शब्दौ स्यादात्मत्वाभावात्
वररुचेरन्त्र इत्यस्य किंच पत्वं टयत्वं मन्त्रस्यात्यन्तविनिगमनाविरहः टाङ्योरित्यत्र टकारङ्कारोऽनुस्वारप्रति
पत्त्यै भ्यस् भ्यमिति भ्यस् पत्र भ्यम् इतिच्छेदः नन्वत्र शकारोऽनर्थकोऽर्थः युष्मभ्यमित्यत्र अनन्तरे सर्वादेशा
र्थोऽपि न भ्यमोऽनेकाक्षरत्वादेव तत्सिद्धिरित्याशयेनाह शकार इत्यादि सचेत्वादिर्व्यर्थमर्थः क्रतलक्षणा
भ्यसमेवेतरेणोपादीयते नतानयनानन्तरं मतार्थं प्रत्यस्त् चतुर्थी बहुवचनमेवात्र भ्यस् पञ्चम्यास्तेन ङसिसा
हचर्यात् स्यतत्रैव ग्रहणात् ङसिभ्यसोः शतुः इति शकारः सर्वादेशार्थः उकार उच्चारणार्थः अत्र ङसिभ्यसः
अः अरितिच्छेदः अकारोऽनादेशोऽनयोरपीति व्याख्यानात् युष्मस्मा युष्मदस्मदस्मत् इति सिद्धाति नवमम
ङसेति तनीयाएवंवत् सामाकमिति सामस्त्रास्त्रकमिति च्छेदः तेन युष्मस्माप्र सामकेभवति अनयोरकाका
रोऽन्तादेशार्थः अत्राहुः नन्वनि युष्माकमित्यादौ गौणत्वाद्यदात्वाभावात् नवर्णान्तत्वात् सुडभावाक यस्सा
मकं इतिचेत्सत्यम् तन्नादिना सामिति द्वयं बोध्यं एकस्यतु सुटा सहागम् सामितिद्वितीयस्यतु आमाहत ह
सोमं ततः असुट् सहितं आम् केवलं अस्य के भवति तयोः अकार इत्यर्थाभवतीति अत्रेदमवधेयं गौण
त्वाद्यदात्वाभावात् नवर्णान्तत्वात् सुडभावादिति कर्मधं गौणत्वात् सुडभावरित्यस्यैवक्रम चितत्वात् सुटा

नास्तिइतिवचनात् स्वशाग्वस्मोतर श्रून्यत्वमत्यन्यास्मिन्निति विशेषरहितलक्षणमन्येवहंति
त्वन्मदानांतुना योनिधक मध्ये श्रपवादाः पूर्वान्विधीन्बाधन्तेनोत्तरानिति न्यायात् योगवि
विभागमामर्थ्यादनन्तरस्येतिन्यायंबाधित्वात्वामाइत्यस्येव ननिषेधः श्रन्यथात्वामार
माना द्वावित्येक योगमेवाकरिष्यन्नेति योगविभागस्त्वत्रापिनेत्याशयेनाह· विशेष्यद्
वमित्यादि: विशेष्य पूर्वयस्मात्तद्विशेष्य पूर्वसंबोधनं संबोधनेतरं पूर्वं इति संबोधनादितरत्संबो
धनेतरत् तत्पूर्वयस्य तत्तद्यमपिहितत्वात्पक्ष्ट्वा इत्यर्थः चादिभिरिति· लुप्यन्तुरोभाव्यादिप
चकस्यैवयोगेनान्यस्येत्यर्थः सोताद्योगएवायंनिषेधः परस्परासम्बन्धेत्वादेशाः स्युरेव·
हरोहरिस्त्वमस्वामीभक्तइत्यादि· श्रत्रकचित् यनहरिस्त्वंभक्तस्तेनवकारेणाहमपिभक्तः
इतियोज्यन् यदित्तनेत्यनेनभक्तत्वारोहेतुनिर्दिष्टतस्तदासापेक्षत्वविधानत्वमेवतादिममितिर
वत्वादेशोनस्यादिति तत्रातिदोहिता:तथाहि· सापेक्षत्वविधानेत्वादेशत्व नास्तीतिनावद्
संगतं श्रादेशाहिविधि· किंचिद्धि धायपश्चादितरविधिस्थान्वादेशः॥ननुनिरपेक्षत्वगर्भः
श्रशक्यार्थत्वात् शाक्तत्वया परिभाषितत्वाच्च· नचप्रयोगदर्शनादेवतथाकल्प्यत इतिवाच्यं·

अर्थतस्तेषांनवत्वं आदेशानांत्रयत्वमितिचेषम्यंशाहूनस्कषष्ठ्योस्तेमेइत्यादीक्रमप्रसंगः स्याद्वि
तीयास्वितिसूत्रत्वाद्वितीयाभिरितितृतीयोपादानं क्रमप्रमाणविभक्त्यासाहित्यलाभार्थंलुप्तायाः
प्रत्ययलक्षणेनसाहित्यासंभवात् नेनेति युष्मत्त्वत्राब्रवीतीत्यादौन तृतीयातुसहयोगे अल्प
स्वरत्वात्षष्ठ्याः पूर्वनिपातः नदेपत्तयाचतुर्थ्याः त्वामामेति॥त्वामाम्रमा इतिछेदः तेमयोरेवा
देयं आमस्त्तनग्रहणं एकवचनान्तस्यानिर्देशात् श्रीशइत्याद्यन्तुकर्मत्वात्कर्मणिद्वितीया
त्वामेतितेमेदानपात्रत्वाच्चतुर्थ्येकवचनंतुभ्यंमह्यमित्यस्यस्थानेस्वाम्यादियोगषष्ठीतिषष्ठ्ये
कवचनंतेमेतवममेत्यर्थः द्विवचनंदर्शयति पातुवामपीति युवामावामित्यर्थः कर्मत्वाद्वितीया
सुखमिति युवाभ्यामावाभ्यामित्यर्थः अत्रापिदानपात्रत्वाच्चतुर्थी पतिरिति वानौयुवयोरावयोरि
त्यर्थः अत्रापिस्वाम्यादियोगषष्ठी बहुवचनंदर्शयति सोव्याद्वोनः इति सहरिः वः युष्मान् नः
अस्मान् अव्यादवतादित्यर्थः शिववः युष्मभ्यंनः अस्मभ्यमित्यर्थः सोव्यात्रवः सन्तः वः युष्मा
कंनः अस्माकमित्यर्थः कृत्ययोगेषष्ठी अनन्वादेशइति युष्मदस्मदोरितिसूत्रेणचोवतिसूत्र
पक्षे तस्यव्यवस्थितत्वमाश्रित्यविकल्पः नात्रावति आदिस्वेचतस्यान्यस्मिन् यस्मात्पूर्वे

सश्चान्योन्यार्थे अ प्रश्नयो· अनंतर्ये ह्यस्तर्नदिने· स्वस्तपरिहिने उच्चैस· उच्चैः नीचैस नीचैः स्वर
स्वर्गे· अंतरमध्ये प्रातर· प्रत्यूषे पुनर भूयस पौनः पुन्ये अहोस्विन वितर्के· अंतरामध्ये अले
भूषायां कृतं वारणार्थे ईषत· अल्पे किल खलु वै निश्चये आरात दूरांतिकयोः भृशम त्य
र्थे यत् सत्कारे शश्वत सतत्ये अ संबोधने अधिक्षेपे निषेधेच· आमयोअत्यर्थयोः वाक्य· स्मर
णायो अ इ ई भर्त्सने उ ऊ ऊ ऋ वितर्कयोः ऋ ॠ लृ लॄ गान लोभे· ए संबोधने· ऐ आह्वाने ओ·
औ भवत्यर्थे औ अंगीकारे· औषट· वषट इति हविर्दाने तत्रः नत्रा अद्य· अस्मिन्दिने अ
धुना इदानीं· सांप्रतं· संप्रति· अस्मिन्काले पूर्वेद्युः पूर्वस्मिन्दिने· परेद्यु· परदिने· अन्येद्युः
अन्यस्मिन्दिने प्रप्रकर्षे· परा निराकरणे सं सम्यगर्थे· अनु पश्चादर्थे अव स्थितिहानयोः
निर निर्गतार्थे· दुर दुः खे अभि आभिमुख्ये वि विशेषार्थे· आङ् मानार्थे· नि· निधाने· अति
अतिशये अपि अधिके अपि संभावनायां प्रति वीप्सायां परि वर्जने उप समीपे अत अद्वायां
अंतरमध्ये· आवि· प्राकट्ये· सुपूजायां इतिचादयः अपस्वरादयः सनुतरितिअंतर्धाने ऊर्ध्व
मितिसत्ये· वियोग शीघ्र सामीप्य लाघवे ष्वित्यन्ये· युगपदिति नैककाले मनागिति ईषद

तेऽनमुह्यघिनशासनंविधेर्विधेहिकीनाशनिकेननानिथिमित्यादौसापेक्षत्वेपि एनोदृशरशनाद
नञ्जभीकरयमितितुनविधिः किंत्वनुवादः अतस्तदूममितिनविरुध्यते॰ एवंस्थितेयेनत्वेभञ्ज इतिव
च्छूह्याध्याहारक्लेशोव्यर्थः किंतुतेनत्रायतेइत्येवसम्बधप्रक्रान्तार्थत्वाच्छुनयच्छुह्यपेदेति॰ने
नेतिविच्यमानेपदेहरिरितिप्रथमान्ततन परस्यादेशः त्रायतेइत्यस्मात् [illegible]ः सइतिप्रथमान्तम
नैचत्रायतेइतिभिन्नवाक्यमितिभ्रमितव्यम सहरिस्त्रामात्रायतइतितेनेणान्वेकसंबंधात्॰ चार
दिर्निपातःइति चआदियस्यसः चादिः आदिशब्दोव्यवस्थावाची॰ आकारार्थइत्यन्य तेनाकृत्य
नामपिसंग्रहः॰निश्चयेनपतत्यनेकेष्वर्थेषुइतितद्योतकत्वान्निपाताः उक्तंचतेर्याः निपातास्त्रो
पसर्गास्त्रयधातवश्चेतितत्रय अनेकार्थाहिविशेषाः पाठस्तेषांनिदर्शनमितिकेचित् निपा
तसंज्ञातुस्वरादीनांसंधिनिषेधप्रभावार्थेतिनिष्कृष्टः प्रणाम्यपितरंशांतेश्च मञ्चमकराभिधाः ञ्च
थयाधप्रगटयेस्वोच्चार्येहदीरितं १ च॰पुनरादौ॰ वा॰विकल्पे॰ ह॰स्फुटपादपूरणयोः हिनिश्चये
अहहखेदे॰ एवमवधारणे॰ एवं॰ अंगीकारे॰ नून॰ निश्चये॰ पृथक्भिन्नार्थे विना॰ ऋते॰ अं
तरेणावर्जनार्थे॰ स्वस्तिकल्याणार्थे अस्ति॰ सत्तायां हाधानञ्के [illegible] मृषामिथ्या॰ असत्ये मिथ्य

श्री
न॰ टी॰
४८

न्कारे अप्रोर्थेति प्रतिषेधे हन्तमिति निषेधविवादयोरिति शाकटायनः अभीत्वामिति अनारते
पुनरर्थेना॰ साकंसार्द्धमित्यलौसहार्थे नमस् इतिनतौ॰ हिरुक् इतिवर्जने धिगिति निंदाभर्त्स
या॰ अथेतिमंगलानंतरारंभप्रश्नकात्स्याधिकारप्रतिज्ञासमुच्चयेषु॰ अम॰ शीघ्रअल्पेच॰ आमित्य
गीकारे॰ प्रतानितिगाना॰ प्रतानितिसमनार्थे प्रतानितिविस्तारे॰ माइतिनिषेधे माङितिनिषेधा
शंकयो चेत्यन्वाचयसमाहारेतरेतरयोगसमुच्चयविनियोगतुल्ययोगपतावधारणा हेतुषु॰ पादपूरणे
पि॰ वेतिविकल्पानविकल्पउपमानहेतसमुच्चयेषु॰ अहेतिविनियोगे एवमितिक्रमपृच्छयोः अपिप्रश्न
सपराममर्षप्रकारार्थावदेशनिअयोगीकारेषु॰ नूनमितिवितर्केनिश्चयेच॰ प्रस्वादिति सर्वकालेपी
नः पुरापनित्यसहार्थेष्वपि॰ कुपरितिप्रश्नावितर्केप्रशंसासु॰ कुविदितिवर्थे॰ प्रशंसायांच॰ ने
दितिशंकायांप्रतिषेधविचारसमुच्चयेष्विति शाकटायनः॰ चेदितिचेदर्थे॰ माकल्यार्थो यमाना
संपत्तिषु काचिदितिअभिष्टप्रश्नेच॰ येतावनवन्॰ मर्षतोऽन्यथेषु नहेति प्रारंभे ॥ हंतेति
हर्षानुकंपावाक्यारंभविषादेषु॰ तानिअर्थोरपि माकमितिनिषेधवर्जनयोः नकिर्नेमा पर्ययेच॰
यावत्तावदितिमतोसाकल्यावधिमानावधारणेषु॰ ने इतिविप्रश्नवितर्केषु॰ इत्यनोवर्कं॰ रइतिदा
नान्नारदयोः नमितिवकारे नयाहि इतिनिदर्शने॰ खल्विति निषेधवाक्यालंकारजिज्ञासानुन

राम
४८

र्थे ईषदीत्यल्पे ज्योषमिति सुखमौनयोः तूष्णीमिति मौने बहिस् इति बाह्ये अवस इति बहि
र्थे समया इति अतिक्रमध्ययोः निकषा इत्यन्तिके स्वयमित्यात्मनेत्यर्थे वृथेति व्यर्थे नक्त
तिनिषेधे अद्धार्थविकल्पेषु नह्यन्यत हि हेतुप्रावधु अपि हे नाविति निमित्तार्थे इहेति सेहे ति प्राका
म्य अह्नाइति स्फुटावधारणयोः नन्वाति शपथयोरित्येके सामीत्यन्त दुष्कुत्सुगुप्सितयोः सनेति नि
नित्ये उपधेति भेदे सनाहिति सनदित्यपि तिरस् इत्यदृष्टौ तिर्यगर्थे च अन्तरेति मध्यविनार्थयो
यो ज्यागिति कालभयसत्वशमयोः शीघ्रार्थे सप्रत्यर्थेऽपि कमिति वारि मूर्द्धनि दाम्सुखेषु या
मिति दुःखापसमे सहसा अकास्मिकाविमर्शयोः नानेत्यनेकविनार्थयोः स्वस्तीति मंगला
पुण्यपक्षे क्षेममंगलप्रत्यभिवादेषु स्वाहेति देवहविर्दाने स्वधेति पितृदाने अलमिति भूषणा
र्थपर्याप्तिवारणनिषेधेषु अन्यादीति अन्यास्ये अस्तीति सत्तायां उपांशु अप्रकाशोच्चारण हे
सयोः स्वमिति हाते विहायसेति विहङ्गे दोषेति रात्रौ मृषेति वितथे मुधेति व्यर्थार्थे निष्फ
लेच पुरेति चिरातीतभविष्यदासन्नेषु मिथोइति रहः सहार्थयोः विरतायामन्यार्थयोरपि प्रायस इति
बाहुल्ये मुहुस् इति पुनरर्थे प्रवाहुकमिति समकाले ऊर्ध्वे ऽपि प्रवाहिकेतिया ठान्तरं आयह लामि वला

श्री
ना॰दी
५०

१ सत्यमितिप्रश्ननिषेधसत्येषु। अन्तमितिसत्यार्थे। नोचेन्नचेदितिनिषेधे। २

स्विदितिअहोवत् सन्तितिसर्वतोभावे। किमित्यनर्थके पादपूरणेच। आमितिप्रतिवचनावधा
रणायोः। हमितिरोषभवचनः। चामितिपुवामित्यर्थे। किमितिअतिशये। शकमितिशैघ्र्ये। अनुकमि
तिवितर्के नहिकमितिनिषेधे। जातुइतिकदाचिदर्थे। कथमितिप्रकारप्रश्ने। कुतइतिप्रश्नविकृवयोःकु
त्सितेदेशप्रश्ने। अनुस्वचेतिउपसर्गप्रतिरूपकौ अनुस्ववदर्त्यजघार्थे। हाहेहे एतत्रयोपिशोभा
यां सेवाइति अन्तःकरणे। आभिमुख्येपि। वइतिपादपूरणे। हिंसाप्रतिलोम्येषु। दिष्ट्याइति
आनन्दे। सच्चजनदर्शनप्रातिलोम्योस्वित्येके। पश्चितितुसगर्थे। सहेतिसार्द्धमित्यर्थः। अनु
थगिति आनुपूर्वे। अंगोमिसंबोधने। हाकू स्माकू इतिम्रितिनिर्थे। अरे रे इतिनीचसम्बोधने। च
टु चाटु प्रियवाक्ये। कुमित्यनिछाभयभर्त्सनकोपेषु। सुष्ठुइतिप्रशंसायां। पुरस्इत्यग्रेपूर्वदे
शपूर्वकालयोश्च। आस्वितिक्षिप्रे। नहीतिविशेषे। रहस्इत्येकान्ते। एवामर्थानांनिपातत्वा
त्कानतुवाचकाः। पदांतरंविनाप्रयोगात् किंचवाचकत्वेघटस्यसमुच्चयइतिवत् घटस्यचइत्यपि
स्यात् अपिचशोभनसमुच्चयइतिवत्शोभनचइत्यपिस्यात् द्योतकत्वेनत्यस्यपदार्थेदेशत्वान्नतत्रावि

राम
५०

येषु॥ निश्चम निश्चयविषादहेतुष्वपि॥ किलेति वार्त्ताक्यकरसंभाव्यहेतुनिरस्कारालीकेषु॥
नधेति प्राह्रप्रश्नसमुच्चयाभ्युपगमयोरपि॥ अस्मेति अलीकपादपूरणे च॥ अमृतीत्यहमित्यर्थे
आङिति ईषदर्थाभिविधिमर्यादाक्रियायोगे॥ उदिति अपर्थे उन्नइति संतर्कसंबोधनपूरणे
षु आदह इति हिंसाप्रक्रमकुत्सनेषु॥ आतंकेति कुत्सनविनाशयोः॥ प्रतिग्रह पीति स्तोकदाय
नः॥ वेलायामिति कलेपरिमाणे च मत्रामित्यल्पपरिमाणे॥ यथेति योग्यतावीप्सापदार्थानति
वृत्तिसादृश्येषु॥ किमिति पृच्छाजुगुप्सयोः॥ ईषदर्थातिशययोरपि॥ धमितिपच्चार्थे हाहा इति विस्म
यविषादशोकजुगुप्सान्तिषु॥ हुइति विनियोगत्रमपादपूरणेषु॥ हेहे प्याट् पाट् एते संबोधनार्थाः॥
अहो इति विकल्पे वदर्थेऽपि नन्विति प्रश्नावधारणानुज्ञानामंत्रणेषु॥ मन्येइति वितर्के॥ नहीत्यभावे॥ उता
विकल्पे आसीत् इत्यर्थः वाक्यालंकारेपि॥ ब्रूहीति प्रेषानुज्ञावसरेषु॥ इतिहतु प्रकारे हठदर्थेपि
माघेत्वावाक्यालंकारेषु॥ ओमित्याभ्यादानाभ्युपगमसमाधानेषु॥ फडिति विघ्ननिराकृतौ॥ यदि प
क्षान्तरे॥ होइति संबोधने॥ इहीति हि ऊं तप्रतिरूपकं गच्छत्यर्थे॥ अहे त्यत्रेत्यर्थे नदिति हेतौ॥ अहो

गेणांद्योतकत्वंनतुवाचकत्वं नउक्तम् उपसर्गेणधात्वर्थोबलादन्यत्रनीयते॥ऽप्रस्यार्थः·उपसर्गे
णद्योतकेनहेतुना ऽन्यधातुपाठपठिताभिन्नः·प्रतीयतेधातुनैव प्रगृधातोरिति· संज्ञानियमए
वायंधातोः·प्राक्प्रयुज्यमानाएवप्रादय उपसर्गसंज्ञानान्येइत्यर्थः·तेनसुरुपुरुषइत्यादावधातोः
प्राक्प्रयोगेपिनोंतातिः·ऽनधीतारितिगृहणात्केचुप्रेछतिप्रचिकीर्षतिइत्यादौनानिष्ट्युतास्त्र
न्यथाभक्तिमायुक्ताः·प्रादयस्तत्तः·प्रागितिसवाच्चेचुपाप्रश्चहूस्ययोगः·इतितस्यैवप्राक्पाठ्
त्येन·वत्कृतत्कृ·योक्ति येन्पस्ययस्मृधातोर्वाच्याक्रियेतिव्याख्यानात्·केवलस्यस्मधातुत्वाभा
वात्स्मातेरेवधातुत्वात्·नत्वव्ययमिति नचैवहूनप्रादिवादि·उपर्यादितवादिग्रहणे·ऽन्ययाने
नरत्वात्सचमौदयएवंगच्छेरन् सदृशमिति॥ऽकृतिलिंगसंख्याकारकाभावपराप्रयावाचेतिपरि
गणनमिदंइत्येके ऽन्येतुउदाहरणमात्रमित्याहुः·वगाह·इतिऽप्रादेरवाकारोलुप्यते·नात्यःऽ
पिनासाहचर्यात्·॥श्रीविद्यानगरस्थायिलोकेशाकरशर्मणा·कृतायामिहटीकायामव्यया
नांकृतिर्गता॥ इत्यव्ययानि ऽग्रावतःस्त्रियामिति आपश्चतःस्त्रियामितिच्छेदः·ऽतःइतितपरकरणा
दव्यक्तग्रहणान्नतुस्वतपरत्वमपिऽगतेन्यादोमहान्तस्यतुमतरर्थायांइतिनिर्देशात्·मापिउःसेर

शेषगणान्वयः॰ अथ एकयं घटस्येत्यादौ समुच्चयादिबोध इति चेत्सत्यं॰ घटपदलक्षणायामेव समुच्चि
घटबोधसंभवात् विजयन्तइत्यादौ विशिष्टनयोधातोरिवेति हिक तस्मादिर्विभक्त्यर्थ इति आदिशब्द॰
प्रकारार्थः गणाभावात्॰ विभक्तिनामर्थयोरभिधेयस्तस्मिन् तस्मादिति निपात्यते॰ तत्रेति॰ अत्र त्रप्रत्यय
स्येत्वं च निपात्यते॰ सत इत्यत्र तस्य प्रत्ययस्येत्वं च॰ बहुत इति ईकारलोपः॰ तेन प्रकारेण तथेति तस्मिन्
कालेतदेति कालप्रकारयोर्विभक्त्यर्थत्वाभावेपि सर्वस्मादयः॰ प्रादेशस्तथेति सर्वस्य सदा तथेति
कालप्रकारयोरुपलक्षणं॰ सप्तम्यादेरिति॰ अत्राद्यादिशब्दः॰ प्रकारे॰ एवं देशकालादिविशिष्टो विशि
ष्टो विभक्त्यर्थो गृहीत इहतु कालविशिष्ट एव विभक्त्यर्थो गृह्यते॰ अद्येति अस्मिन्नहनीत्यर्थः॰ इद
म॰ अत्र प्रत्ययस्य॰ परश्वः॰ परेद्यवि॰ पूर्वस्मिन् देशे पूर्वस्माद्देशात् एवमादेशः॰ इत्यर्थः॰ उपरि ऊर्ध्वमि
त्यर्थः॰ प्रादिरुपसर्ग इति प्रआदिर्यस्य स प्रादिरिति तद्गुणसंविज्ञानबहुव्रीहिः॰ नन्वतद्गुणसंविज्ञानबहुव्री
हिः॰ प्रकृ इति लिंगात् अन्यथा प्रइत्यस्य धातोः प्राक् पाठो न स्यात् उपसर्गेपि स्यात् ते॰ उच्चार्यते क्रिया
वाचकस्य तु उपसर्गः॰ [illegible] क्रियायोग इति लभ्यते॰ [illegible] पाठ्युक्ता॰
प्रादयस्तत्रप्रयोगेपसर्गसंज्ञा इति॰ यस्य धातोर्वाच्या क्रिया यत्क्रिया तया युक्ताः तं धातुं प्रति॰ उपसः

तेन नराणावपि नदीनर इत्यत्र नञ्प्रत्ययस्य याप्रत्ययो: प्रत्ययस्यैव ग्रहणमिति परिभाषाबलान्नह्रस्वत्वमेव ।
विहीणानित्यं ह्रस्व: आ स्या नि नराक प्रत्यये समानस्य ह्रस्व: आर्य्यका कालिका जम्बुका डाडका
इति कृते केन कल्याणपुंस्त्रीक: आपोवा वहुविद्याक: बहुविद्याक: एवं चेनर्थे लाभाय यवक्यान्तरे
वेद नाम्न: परस्मिन्यां विहितस्य स्वरस्य ह्रस्वो वा स्यात् स्त्रीलिङ्गे परे नञ् स्त्रीलिंगलद्यानुसा
राद् नारादिकमेवग्रहणं ते इत्यादि स्थानेगौरवप्रसक्तावद्रूपं दितिते किं च स्त्रवतिस्तत्रितेन
दिकेत्यादिनानिषेधेन प्रस्य लोप इति इस्य स्थ स्य यनस्य स्वरो यकारस्य तास्तु तस्यैवप्रकर
णात् स्यदेस्यातोऽ इति लिंगाभ्यां त्यादिकत्स्वरेण अन्यादिलिंगाच्च यकारस्यैव ग्रहणं
स्वेन पनदीर्घयोरेव पलोपइजिकुनस्त्वित तन्त्रादिना यकारलोपार्थे तेन गार्गीतिरूपेपोषका
त्तिन इत्यादौ सिद्धे आत्वाश्रयणादीर्घयोरपि ईप्यन इति ईपिपरे स्वनोऽकारस्य लोप इत्य
र्थ: एतन्मलतुनोवेत्यत्र वा इत्यस्य व्यवस्थितत्वाश्रयणं क्रित इति सूत्रद्वयमत्राचेतयूरं
तेद्दतो यस्य स क्षित तस्मात् पिरेसादि दंतादुदन्ताद् दंताद् नाम्न: स्त्रियामीवित्यर्थ: वराली
त्तिवरणशीले तिविंशवृत्रो धातो: वाको कणीइति वाक प्रत्यय: युणाप्रतिगुणा: कुरबुचर

रादेशस्याछन्दस्यनस्यस्त्रियांग्रहणभावात् अधिकृतस्यनाम्नोविशेषणात्तदन्तविधिः स्त्रियांइतिप्र
कृतिविशेषणमित्यभिप्रेत्याहः स्त्रियोवर्त्तमानादिति अजादस्येति इपूर्वाधनार्थमिदं अजाद्या
जातिलक्षणाईप्प्राप्त वालेतिवयसिप्रथमेइतीप्प्राप्त पुंयोगेपीति यदिज्येष्ठादयःप्रथमजातात
वर्त्तन्ते तदादन्तत्वादेवाप् यदाज्येष्ठस्यस्त्रीति पुंयोगोविवक्ष्यते तदापिआबेवभवतीति सूचयितुम
पिशब्दः एतद्दीजेनज्ञतेः स्त्रियामाविनस्तत्रपीयविपरीतानिर्देशाद्विकल्पादिलाभः काप्यतइति
कापिइअतइतिछेदः कस्यहितस्त्रियापु तस्मिन् कप्रत्ययएवग्रहीतेआपासहव्याख्यात् तेनशङ्कोक्ती
तिशंकेत्यत्रन अतः इकारयीतिवक्तव्येविपरीतनिर्देशाहन्यदपिभवति तेनकाचित्प्रत्ययस्यैकेयिकः
विषत्यस्यापिभवति नरानुकायतिनरिकामामिकेत्यत्रएवंस्थितेसाहचर्येणप्रावर्त्तनियमकं इत्युक्ति
गौरवप्रसक्तत्वादुपेक्षिता स्त्रियामित्यत्रानुवर्त्तते स्त्रियांवर्त्तमानस्यनाम्नोअतइर्भवति इतिव्याख्येयं
तेनकारकमात्रानिकारकाइत्यत्रनेत्वं अतः किमात्रका दियकेति एतद्दीजंतन्नेमेव कविद्दीन
अत्रापिविपरीतनिर्देशायबमूलं ह्रस्वोवेति ह्रस्ववाह्वाइतिछेदः स्त्रियामित्यनुवर्त्तते स्त्रियां
वर्त्तमानानाम्नः परस्याकारस्यह्रस्वइकारश्चवाभवतीत्यर्थः वेत्यस्यविवास्यितत्वंबोध्यं तेन

अकारोच्चारणस्यतुनसामर्थ्यं धर्मादिनिसुधर्मेन्याशावपि तत्सामर्थ्यात् लोपाभावप्रसंगात्·
ईहूकेरात्यतीतिईहूयति तत्र·क्विपिईहूतस्यईहू·स्त्रीईहूकुर्वत·ईहिय·स्त्रीईन्यादित्युच्यत·इत्य
उक्तेतरनहंतत्वाट्टवन·ब्राह्मणीतितुब्राह्मणामानयतिजीवयतिइतिविग्रहे अनश्राणानइत्यतोऽस्य
तत्कर्मण्यणि·पुराणान्तत्वान्तरागाईपिशालेचसिद्ध्यतिस्त्रवेतुईहूस्यस्त्रीतिवाक्येईहूत्यनिष्टरूप
प्रसंगवारणायेतिवाच्यम् ईहादेरानचेतितुनसूचितम् आगमलिंगाभावेनसर्वादेशप्रसंगात्
अनुणापिनक्षत·अल्लोपः स्वरे इतिलोपप्रसंगात् अकारोच्चारस्यतुप्रकृत्यकारवारणा
र्थत्वेनचरितार्थत्वान्नसामर्थ्यं शर्वशर्वे च·अत्राहुः·अनुकसुवर्चमात्रालाघवोहितित्र
त्रेदमवधेयं मात्रालाघवोपिप्रक्रियागौरवस्यसत्वेनतुल्यत्वात् तथाहि·अनुकसवर्णेदीर्घः सह
त्रगाईविति स्त्रमहूयअनीपितुदीर्घः स्त्रमेवेतिलाघवं·महत्वइतितत्रयत्नमहत्वमनर्थार्थत्वाभि
तिभावःतदेतचस्त्रिणामितिवक्तव्यमन्यथाधोहूस्वःस्त्रियांयोरित्यादेः प्रवृत्तिर्नस्यात्·स्त्रि
यांहूस्वभावात्·यवाद्दोषइति यवानीतिजातजरमवानेनविधीयते·अयमेवचाभ्यासे·१२

नीतिविग्रहे॰ चरणानाविन्यतोऽटाविति टप्रत्ययः॰ गोणत्वंतु नेष्टं॰ वक्रयराकायद्भक्कुरुचराविद्बुषीति उदन्ता
द्युदंतान्नुगोणत्वेपिप्रियविदुषी प्रियपचेती गोणमुख्यन्यायस्यानित्यत्वात् धृदित्याद्युधातो
ल्किार्यत्वसंख्येनैव॰ इतिनियमेनप्राप्तिर्वीधिता॰ मन्त्रनादिति एतन्मूलं तुश्रावतः स्त्रियामिति
सूत्रे विपरीतनिर्देशएव॰ एवमुत्तरत्रापि नहाटेरिति नटश्ादिर्यस्यसनटादिर्गणः तस्मान्नटादेः
नहादयो यच्चापिटितोनिपातितास्तेषामपिइहाटितिएवबोध्याः स्वरार्थत्वंतुइहानुपयुक्तमेव॰
वैदिकोनामप्रतिपाद्यत्वात् अतइत्यनुवृत्तयथासंभवंविशेषणीयं अखीन्याहिनसिद्धेत॰ यर
दितुपत्याद्विनमेयांतदानुवृत्तविशेषणत्वेनसंकोचः नदीमकुर्तीकुर्वतीचानदीनेदित्यत्रातिप्रसंगः
वारणायान इत्यनुवृत्तिरावश्यमभ्युपेया एकदेशविकृतन्यायेननदशाद्भत्वात्प्राप्तिः एवंवराकमि
च्छतीकुर्वतीमवराकीवराक इत्यत्रापिनश्वनुवृत्तेस्तत्रापिसत्वात्॰ कुमारीतिप्रथमवयोवाचीप्राद्
एवनत्वनद्वयप्रयुक्तः॰ वृद्धकुमारीतिगोणः प्रयोगः नरुणीशीलात्वपिमुख्यार्थेवृत्त्यादितस्यगोणो
तीकइतिवर्णगणत्वेपिसंभवात् इन्द्रादेरानीषहीत॰ अत्रपुंयोगेचेत्यतः पुंयोगइत्यनुवर्त्यते॰
दीर्घोच्चारणानुक्तचिदहितेपियम्यलोपइतिज्ञापनार्थः अन्यथाऽनीपिलोपएवंनस्यात॰ अ

विसुग्रहाजातिरिति लक्षणान्तरं अत्रतार्थस्त्र एकस्मिन्नियोगस्तत्र देकवारमाख्यानात्त्रयं गौरिति उप
दिष्टापिपिंडान्तरे सुनिग्राह्यानिष्कत्वं शक्योत्यर्थः अप्राप्तप्रापणं चेद् ननु सर्वलक्षणासंकोचक
तेन तदादेर्जातित्वं देवदत्तादौतु उपदेशाभावान्न लक्षणसमन्वयः यस्तु सर्वलिंगेषु आचार्याज्ञा
तिवाचित्वमुपदिशंति तेषु भवतीत्यर्थः गोत्रं च चरणैः सहेति गोत्रशब्देनापत्यमुच्यते चरणश
ब्देन शाखाध्यायिन उच्यंते तेनापत्यप्रत्ययान्तः शाखाध्येतृवाचीच शब्दो जातिवाचक इत्यर्थः कुकु
टीम यूरीति प्रथमस्योदाहरणम् ब्राह्मणीवृषलीति द्वितीयस्य गार्गी पैलूपवस्तीयाखी चिन्तनीयस्य
कठी बह्वृचीति चतुर्थस्य गवयेत्यादिनोक्तस्यानित्यत्वादिति भावः हस्तान्ताद्धितेत्यादि एतद्बीजनु
यस्य लोप इति सूत्रव्याख्यावसरे एवोक्तं जानपदीत्यादिषु योगे अत्र चकारस्य व्यवस्थितत्वात्प्रयोगा
ति भावः आवपन इति उप्यते निक्षिप्यते धान्यं यस्मिन् तत्र तस्मिन् गोणान्यायाहत्तिके नाम अम्ब
विमध्यामिति अस्तकनायामित्यर्थः आग्रेति पक्ष्म इत्यर्थः अय्योविकार इति फाल इत्यर्थः कुपा
दुम्बरसंकव वजुर्ब्रीहिरिति एतद्बीजनु चकार एव सुरापीतिनाम्न कृते नित्यमुत्पन्ने प्रागेव समा
सः सिवनेन समासेन सुरपीतादिकमेव स्वाङ्गाहेति समंगस्वाङ्गमित्युक्तौ सुमुखा शालाइत्या
दावतिव्याप्तिः सुमुखस्य शालावयवत्वात् दीर्घके शीर ख्याइत्रमात्र्यासिद्ध केशान्तरप्रयोग

दोग्ययत्नपवा त्वजानेरभावेपितदाकारत्वुकृतिः आख्योरणीति स्वामिनीविषयपावेत्यर्थः पुंयोगेवि
ति पुंसापुंसोवायोगः सम्बंध पुंयोग तस्मिन्पुंयोगभावेसप्तसप्तमीयं पुंयोसतीत्यर्थः गणाणीर
तिगणाकस्यस्त्रीत्यर्थः स्त्रियांहीन्नि स्कसाहचर्यात् तस्येयइतिसम्बधात् तद्धितस्वभेदविवक्षातोन
यदिभेदविवक्षातदागोणकीत्यपिभवत्येव पुंयोगस्त्र नदापत्यरूपएवकिंतुजन्यजकभावलद
णापितेनकेकयीत्यपि पालकान्तान्नेति चकारस्याव्यस्थितत्वादित्यर्थः स्तरीति सूर्यागस्त्य
योरीयङीचेतियस्यलोपः जातेरस्त्रीविषयादयोपधादिति लक्षणमुच्यते आकृतिग्रहणाजातिर्लिंगानां
चसर्वभाक् सकृदाख्यातनिर्ग्राह्यागोत्रंचचरणैःसह १ अस्यार्थः आकृतिग्रहणाजातिः आकृतिः
संस्थानंग्रहणंयस्याः साआकृतिग्रहणा अवयवसंनिवेशविशेषव्यंग्येत्यर्थः अनेनगोत्वादिजा
तिर्लक्षिता ब्राह्मणत्वादिजातिस्तु ब्राह्मणक्षत्रियादीनांसंस्थानस्यसादृश्यात् अतोलक्ष
णान्तरं लिंगानांचेत्यादि सर्वाणिलिंगानिनभजतीति अयमर्थोविवक्षितः सर्वशब्दस्यलिं
गापेक्षत्वेपिभजोविण्प्रत्ययः समासश्चवाधकत्वात् लिंगानामितिकर्मणिषष्ठी सर्वलिंगं
नभजति इत्यर्थः सकृदिति असर्वलिंगत्वसत्यकस्यांव्यक्तोकथनात् व्यक्त्यन्तरकथनंविना

त्वाभावात्. अत एव त्वपि दारायस्वांगलक्षणमुच्यते अद्रवन्मूर्तिमत्स्वांगं प्राणिस्थमविकारजं अतत्स्थं तत्र दृष्टं
च तेन चेत्तत्तथा युतं. २ अस्यार्थः प्राणिस्थं स्वांगं प्राणिनीति स्थानीति अप्राणिस्थं एतेन अचणमुखा शाला इ
त्यत्र न भवति. अप्राणिस्थत्वात्. द्रवतीति द्रवत् ततोऽन्यदद्रवत् एवं च सुस्वेदेत्यत्र न. द्रवत्वात् मूर्तिमदिति अव
गतपरिमाणं मूर्तिः असर्वगतानि द्रव्याणि तेषां परिमाणं मूर्तिः स्पर्शवद्द्रव्यपरिमाणं मूर्तिरित्य
न्ये तद्यस्यास्तीति मूर्तिमत् एवं च बहुज्ञाना न भवति. अमूर्तिमत्त्वात्. अविकारजमिति. विकारो वाता
दिवैषम्यं तस्माज्जातं विकारजं तेन न भवति इति अविकारजं. एवं च सुशोफा इत्यत्र न. अतत्स्थमिति सं
प्रति अप्राणिस्थस्य अपि कदाचित्प्राणिनि दृष्टं चेत्तदपि स्वांगं भवत्येवेत्यर्थः. चयाच्च दीर्घकेशी रथ्या इति भव
त्येव. इदानीमप्राणिस्थस्यापि पूर्वं प्राणिनि दृष्टत्वात् तेन चेदिति. अतत्स्थमित्यनुवर्तते. अप्राणिस्थम
पि मुखादि स्वांगं तेन चेन्मुखादिना तत् अप्राणि द्रव्यं तथा युतं भवति. प्राणिवदप्राणिस्थमपीत्यर्थः. एवं दीर्घमु
खा प्रतिमेति भवति. प्राणिवदप्राणिस्थस्यापि नेत्रात् नासिकेत्यादि वाग्रहणादेतत्सर्वं नासिको दरयो
स्वरत्वाद प्राप्तिः. ओष्ठादीनां तु संयोगोपधत्वाद प्राप्तिः. कल्याणक्रोडेति. अस्वाङ्गपूर्वपदाद्वा. क्रोडा. कीलिं
गायमिति हरदत्तादयः. अत्रान्यापि न हस्तेत्य दन्ताद्यप्राप्तिः. अमरस्तु नन्ताक्रोडभुजान्ता
रमित्याह. रत्नमतिस्तु पुंस्त्वमाह गण्याचक्रोडेति नाममात्रपठनात् नन्वावत मिति ग्रारत्नमहाद

धिकारः॰ एवंचाविशेष्याल्लिंगत्रयेप्युदाहरणंबोध्यं॰ माधवस्तुनदादिगणेक्रुडनिमज्जनइतिधातुमाह॥
क्रोडः अत्र॰ क्रोडाद्यस्वांनामुरस्त्वावर्तायस्वभावतो विशेष्यविठय क्रोडादिष्वत्रावंतस्यैवपाठात॰भु
जान्तरमात्रवचनस्यक्रोडशब्दस्यबहुव्रीहौस्वांगलक्षणाईपूर्वविकल्पोभवत्येव॰ कल्याणक्रोडीकल्या
णक्रोडा॰ मयूरीतिक्रोडादिराकृतिगणः प्रागनुदेशात॰ वोगुणादिति वाङोः गुणात्‌ इतिच्छेदः ऊरिति
वुन॰ ऊप्रत्ययइतिव्याख्यानेन॰ कार्यिणा॰ प्रागनुदेशात्‌ सतोविकार्यिः कार्येणाभाव्यमिति ऊरि
त्यपि उवर्णान्तस्यग्रहणात्वोकारान्तगुणस्यतदभावान्नचेवलस्यापि उमात्रस्यगुणस्याभावात
गुणशब्दोपिनहृस्वरूपपरः तस्यानुदंत्वात्‌ गुणमात्रवाचिपरोपिन॰ तस्यास्त्रियामप्रयुक्तेः गुणाङ्गु
ल्यादय॰ पुंसीतिवचनात्‌ गुणालक्षणाच्च॰ ऊपत्यनुजहात्यन्यत्‌ हृस्वेदृष्यान्तरेषपि॥वाचकःस
र्वलिंगानांद्रव्यादन्योगुणःस्मृतः इति १ स्वरसंयोगेपाद्दिवाप्राग्वादे तत्स्वरूः पातेम्वरा॰ गत्या॰ तत्र
पाणिग्रहणोत्करुठाभिधायित्वागुणावनत्वे एवमन्वाद्दरिति मनरोहिर्यस्यस मन्वाद्दिः आदिशाद्वः
प्रकारेतेनभ्रुआकप्यग्निकुसितकुसिदपूतक्रतुवोगृहीताः पूतक्रतानायीतिपूतक्रेयेनसपूतक्रतुल
स्यस्त्रीत्यर्थः भ्रुआकपायीति वर्षतिकामानितिवृषः नाम्युपधात्कः आकपयातिपापानिति

ग्नाकंपि: अन्तर्भावितण्यर्थ: इत्वरिवइति इ: यत्वागमजमनित्यमितितन्न । खित्वाभावादिप्रत्ययेऽनुमोपप्र
पेरागजत्वेनानित्यत्वाप्रयणस्य व्यर्थत्वात् वृषस्यासौ वाकपिश्च वृषाकपिस्तस्य स्त्रीत्यर्थ: हरवि
स्नु वृषाकपी । वृषाकपायी अग्नायी: पुंयोगे किं । कृताकृतेयेययासा पृतक्रतुरेव । पत्याद्युयई इति ।
नत्वेमिपात्यते ई स्तनुनान्तत्वादेष । क्वचिदेदृतिपुंयोगे चेत्यत ञ्वकारानुवृत्तेरितिभाव: उतऊरिति अन्र
ज्जु: ओरित्यनुवर्त्तमाने उतइति किमर्थं नवाच्य उदान्तानामाभूदिति । वधुरित्यादौ सति प्रसति विशेषा
भावात्तत्स्नु प्रयोगतत्संवर्हस्यवागुणशङ्कस्याप्यनुवृत्ति: स्यादिति । ऊ मत्तितनुत्तिर्मिति । माधवत्त
न्न । खलयं । यवल्व । इत्यत्र विशेषसत्वात् असत्यमित्यस्मिन् यौवतिसनि तु ऊ मिति तस्यचा
मशसोरस्यतिबाधकमिति अत्रेदमवधेयं । मनुष्यजातिवाचिन: उदन्ता दुपत्यविधानेनख
लथ्वादिशब्दानां क्रियावाचकत्वेन जातिवाचित्वाभावादियांशे विशेषस्यासंभवात् अथात्र मनुष्य
जातिर्न वर्णोदितेतिवाच्यं न । ऊड्त इति सूत्रविवरणे उदन्तान्मनुष्यजातिवाचिन ऊङ् इति दीक्षितादि भि
र्वैकल्पात् श्वसुरस्येत्यादि पतन्मूलत्वेनु दीर्घकरणमेव । अन्यथा उदन्तात् सर्वेणा दीर्घेणापि सिद्धे ।

उकरणंव्यर्थंस्यात् पुंयोगलक्षणोईपिप्राप्तउ· ततसंयोगेविधीयमानोलोपः सन्निहितत्वादकारस्यैवा
वाकारस्यनन्याहः उपमानवाचिपूर्वपदात्स्त्रितिथाद्रीकराभ्यांकरभोपमोरुरित्यत्रतुन· करभशब्दस्योपमा
मानवाचित्वेपूर्वपदत्वाभावात्· शफोरुरित्यादिशफारवुरौताविवसंश्लिष्टत्वादुपचारः यद्यपिशफंक्ली
वेखुरः पुमानित्यमरस्तथापिशफशब्दस्यपुंस्त्वमपिवहुसंमतंसपः गवादीनांमूलेविटपिनामपि
इतिहेमचंद्रकोशात्· नृनरयोरितिईपः· नृशब्दान्नरशब्दाच्चजातिलक्षणाप्व·
ननुनरशब्देन्याकारस्यषष्ठीनिर्दिष्टत्वाद्वृद्धिरस्तु इतिवाच्यं· नचान्त्यवृद्धिविफलालोपवाधित्वात्तत्क
प्रवृत्तिः उच्यते· नरस्यतत्र·नरः हलादित्वाद्दूलोपःनाचनरस्यान्तेनरौतयोरित्यर्थः प्रश्लेषसामर्थ्याच्चना
न्याकारोगृह्यते· यूनस्तिरिति· वस्तारस्तइत्यतोरसइत्यनुवृत्तेरस्यादावपिरसेनलोपः यद्वावइइति दि
त्वा युवनशब्दस्यतइतिश्चादेशोभवति इत्प्रत्ययः स्त्रियामित्यर्थोवाच्यः युवतीतियोतेः शान्नता
दीपिवोध्यम् श्रीविद्यानगरस्थायिलोकेशकरशर्मणा॥ प्रणगात्कृतायांस्त्रीप्रत्ययविचारणा॥
अथविभक्त्यर्थोनिरूप्यते·॥ ॥ ॥लिंगार्थप्रथमेति॥ ॥लिंगंचप्रत्ययार्थलिंगार्थः

तस्मिन्नलिङ्गेर्थेलिङ्गे अर्थेचप्रयमेत्यर्थः कस्मार्थेइत्याकांक्षायां यस्मात्स्यादिविधिस्तस्मार्थे सादयश्च
नाम्नोधीयंते अतोनामार्थेइति लक्ष्यमेवनामार्थमाह नियतोपस्थितिकइति नियताउपस्थि
तिर्यस्यसः यस्मान्नाम्नः योर्थोनियमेनभासतेसतस्यार्थः नियतलाभश्चामन्त्रणेचेतिसूत्रार
म्भात् नामार्थस्यद्विविधत्वंदर्शयति अलिंगाइत्यादिना अलिंगसंख्याः प्रथममुदाहरणमव्ययं
द्वितीये उदाहरणंकृष्णइत्यादि यद्यपिनीलरूपवत्परोयमनियतलिंगस्तथापिवासुदेवेभगवति
नियतपुंल्लिंगएवेतिभावः कस्मात्लिंगमेवनामार्थस्तस्यनियमेनभानात् तदुदाहृतलिंगनामार्थः
व्यतिरिक्तमात्रेलिंगमात्राधिक्येप्रथमाविधानम् कारकसंबंधयोस्तुनाम्नोनियतभानाभावात्
नतयोराधिक्येप्रथमा यदिलक्षणशक्त्योर्विषयपरः शक्तिस्तुप्रातिकलक्षणाच गौणीतुलक्षणांतर्भूता
पृथग्वास्तु जातिव्यक्तित्रिकंचनामार्थइत्यस्मीयतेतदालिंगत्यपिमास्तु लक्षणाविचित्रत्वेपिन
हानिः नियमाप्रात्यागात् शक्यलक्ष्ययोरगौणंच पुंल्लिंगस्त्रीलिंगनपुंसकलिंगत्वलक्ष्यमितिवैचित्र्यं शक्यएव
एवेतिनियमस्यपुंस्त्वादिनालिंगस्यवाच्यत्वेपिनियमस्यात्यागात् लिंगत्वेनैवलिंगस्यवाच्यताभ्युपगमात्
स्वारीत्यादिपरिमाणवाचिनामपिनामार्थएवनियमेनभानात् एकइत्यादिसंख्यायास्तुनाम्नैवाभिधा

मकप्रथमानेतिचेत् सत्यम्· नकेवलाप्रकृतिः प्रयोक्तव्येतिनियमात् अनन्वितार्थकप्रयोगापत्तया
अप्रतुवात्कप्रयोगस्यैवन्याय्यत्वात् ननुकृक्स्मइत्यादावस्तीन्वध्याहारेणान्योक्तप्रथमेत्यनेनैवसिद्धे
किंमेतेनेतिचेत्सत्यम् अध्याहारगौरवात् मुलोयेनपीतइत्यादौसविसेषणावाक्येध्याहारस्याना
वश्यकत्वाच्च· ननुतस्मात् सिउजसौत्तस्त्रेणैवविभक्तिविधानात् किंकारकप्रकरणेनेतिचेत्स
त्यसिद्धेसत्यारंभोनियमायेतिनियमार्थं अयमेवकारः सचद्विविधोविभक्तिनियमार्थनियमस्त्वा
द्येनमार्थएवशुप्रथमाकार्यएवद्वितीयाकरणएवतृतीयाइत्यादौ अत्रपतेन्न्यायेभ्यानप्राप्तिः ॥
द्वितीयेतुनामार्थेप्रथमैवकार्येद्वितीयैवकरणेतृतीयैवेत्यादि· अत्रपतेन्नभ्यापिभवति· आ
मंत्रणेचेति आमंत्रणमभिमुखीकरणं अनुकूलकरणमितियावत्· आमंत्र्यतेप्रसन्नः क्रि
यतेऽनेनेतिसाधनेल्युट् इहसंबोधनंप्रकृत्यर्थंप्रतिविशेष्यंक्रियांप्रतिविशेषणमितिसिद्धांतः
संबोधनपदंयच्च· तत्क्रियायाविशेषणंइत्युक्तत्वात्· एवंचदेवमांपाहीतिवाक्यस्यदेवसंबंधिसंबोध
नविशेष्यकंमत्कर्मकंत्राणमित्यर्थः भोस्तभगोस्तअघोसइत्यादिर्योग्यतावलात्भवतायःस्या
निनः आदिश्यते· इतिप्रथमा· शेषाःकार्यइत्यादि· शिष्यतेइतिशेषाः कर्मणिघञ्‌उ

क्ताः प्रथमाद्याः सप्तम्यन्ताः षड्विभक्तयः शेषाः द्वितीयाद्या इति यावत् · कर्मादयो यास्य षड्विधाः ये ते
निर्दिष्टास्तेषां यथाक्रमं शक्तिः तत्र प्रथमनिर्दिष्टमाह · कार्य्यमिति क्रियते कर्त्रा स्वक्रियया नि
ष्पाद्यते तत्साध्यं फलं तत्साध्यं च उभयमप्युद्दिश्य कर्त्ता प्रवर्त्तते · यथा स्वव्यापारेण यागेन स्वर्गं च साधयति
तदात्र यच्च द्वितीया तत्संबंधात् · द्वितीयावाच्यस्याश्रय एव ननु फलं तस्य धातुनाएव लाभात् अ
नन्यलभ्यस्य च शब्दार्थत्वात् · वाच्यतावच्छेदकत्वाश्रयत्वं · अत एव नाश्रयत्वं वाच्यं · आश्रयत्वस्य
वाच्यतावच्छेदकत्वे गौरवात् तच्च कर्म द्विविधं · ईप्सितमनीप्सितं च · तत्रेप्सितं त्रिविधं · निर्वर्त्य ·
विकार्यं प्राप्यं च · अनीप्सितं तु चतुर्विधं · औदासीन्येन प्राप्यं द्वेष्यं संज्ञान्तरैरनाख्यातं अन्यपूर्वकं च
ति तत्र निर्वर्त्यं यथा · पूर्वमनुत्पन्नमेवोत्पद्यते सदेव वा प्रसिद्धिं भवति तत्र विकार्यं तु द्विविधं प्रकृत्युच्छेद
संभूतं गुणान्तरोत्पत्त्या च · कटं करोतीत्यादि · कटं पूर्वमसदनुत्पादयतीत्यर्थः रूपं पश्यतीति प्राप्यं
चातुर्यइति · प्रशस्तं चतुरस्यास्तीति चातुर्यः प्रशंसायामणीयोऽण् · राज्यप्राप्तिसंस्कारे
पूर्णीकृतिरिति संस्कार्यं कर्म · सोमं सुनोति गुणान्तरोत्पत्त्या विकार्यं · अन्यदप्युदाहृयते · प्रकृत्यु
च्छेदसंभूतं विकार्यं यथा · प्रकृतेः प्रकृतिभूतस्यात्मनः उच्छेदसंभूतं तच्च यथा · काष्ठं भस्म करोति ·
औदासीन्येन तृणं स्पृशति · द्वेष्यं तु विषं भुङ्क्ते · संज्ञान्तरैरनाख्यातं यथा · गां दोग्धि पयः · अन्य

पूर्वकं यथाक्रममभिकुध्यते प्रदानीत्यंते· इप्सितानीप्सितयोः शब्दो धर्म्येकरूप एव· ईप्सितत्वादे
स्तत्र भानाभावात् तथाहि· कटं करोति कारुः कट इत्यस्य कटनिष्ठोत्पत्त्यनुकूलप्रकारः को भिन्ना
श्रयको वर्त्तमानो व्यापारः· विषं भुंक्ते इत्यत्र गलादधोदेशसंयोगस्यानुकूलप्रकाश्रयको व्या
पारः इत्यादावीप्सितानीप्सितयोरभानादेकरूप एव शाब्दबोधः एवं च कर्मशब्दस्य यौगिकत्वा
देव सिद्धे कर्मसंज्ञाविधायकानि नानोक्तसूत्राणि ज्ञानार्थानि कर्मणि द्वितीयेत्यस्य फलनिरूपिता
श्रये सर्वत्र द्वितीयाः सिद्धत्वात् असत्कार्यवादे तु निर्वर्त्यस्य कर्मकारकत्वाऽप्राप्तिः तस्यासत्त्वादे
व फलाश्रयत्वानुपपत्तेः क्रियाजनकत्वाभावात् कारकत्वानुपपत्तेश्च· क्रियां कुर्वद्धि कारक
मिति सिद्धान्तात्॥ इति द्वितीया॥ कर्त्तृकरणे चेति॥ क्रियां करोतीति कर्त्ता· धातूपात्तव्या
पाराश्रयः यदा यत्तादयो व्यापारो धातुनाभिधीयते तदा तस्य कर्त्ता· काष्ठानि पचंति ज्वालिकान्तैः
सम्यग्ज्वलंतीत्यर्थः· अग्निः पचति सम्यक्क्वाथयतीत्यर्थः स्थाली पचति स्वस्मिन्समाव
शयतीत्यर्थः तत्र व्यापारस्य धातुनैव लाभात् आश्रयमात्रे तृतीयापवादाच्च· अनन्यलभ्यस्य श
ब्दार्थत्वात् स च त्रिविधः स्वतन्त्रः प्रयोजकः कर्मकर्त्ता चेति· तद्यथा· मया हरिः सेव्यते· कथ्यते ह
रिणाऽऽगमयति कृष्णं गोकुलमस्मद्भिन्नाश्रयकाहरिकर्मकसेवनानुकूलो व्यापारः हर्यभिन्ना

अपचक उत्पादनानुकूलो व्यापारः गोकुलकर्मक गमनानुकूलः॥ स्वाश्रयव्यापारानुकूलो व्यापार
इति प्राहुर्बोधाः क्रियासाध्यतेनेनेति साधनं· क्रियासिद्ध्युपकारकं· न देवव्यापारवत्कारकं क
रणं· अविलंबेन क्रियोत्पादकं वा तत्र तृतीया तस्याश्रयो व्यापारश्च पृथक् पृथग्वाच्यो·
भिन्नं स्वरेणोत्पादि· एकरामाश्रयको व्यापारस्तन्न्यूरितोयः· परस्ता दभिन्नाश्रयकोयो व्यापारः·
संयोगभङ्गनादि स्तत्साध्योऽयः प्राणवियोगस्तदाश्रयो रावणः इत्यर्थः इति तृतीया॥ दानपात्रत्वं तु
धीति· दीयते इति दानकर्मणा युक्त दानस्य पात्रं योग्यमित्यर्थः· योग्यभाजनयोः पात्रमित्यमरः· वेदविदः
गोरदाति वेदविदुषे पशुकगोनिष्ठायः सत्वत्यागस्तदनुकूल एकाश्रयको वर्तमानो व्यापार इत्यर्थः· तत्प्रा
चस्वत्वनिवृत्तिः परस्वत्वापादनं· खण्डकोपाध्यायस्तु स्वीयत्वपटं ददामीत्यादेस्तु उद्देश्यत्वाच्चतुर्थी·
श्रोत्रियाय कन्यां ददातीत्यत्र तु स्वात्मत्वात्मीयत्वयोस्त्यागेऽपि परगोत्रत्वेन ज्ञातित्वस्य स्वत्यागादिति
मह्यं: परस्वत्वरूपस्य दानस्य स्वसत्वात्· स्वस्य भावः सत्वं· स्वशब्दस्यार्थे वस्तुत्रये आत्मीय ज्ञाति
धनरूपेषु· स्वत्वशीने· इति· पक्षे इष्टप्रापणानुकूल एकाश्रयको व्यापारः इति चतुर्थी॥
विश्लेष इति· श्लेषणं श्लेषः संयोगः विगतः श्लेषो विश्लेषः पतितार्थमाह· विभाग इति अवधा
विति अवधीयते एकत्वपनयात् ज्ञायते सोऽवधिः क्तप्रत्ययधातुपात्त्यागभ्यानाधिष्ठत्वे सति तज्ज्ञाप

श्री
त·द्वी
५८

विभागाश्रयः हिमवद्इति · हिमवद्भिन्नावधिकनिःसरणपूर्वकोत्तरानुकूलगंगाभिन्नाश्रयको
वर्त्तमानोव्यापारः धावतइति · शीघ्रगत्यनुकूलायो व्यापारस्तदाश्रयो योऽश्वस्तदवधिकोः यो देशसं
योगानुकूलएकाश्रयकोऽतीतोव्यापारः इति क्रियाविषयस्यापायस्य प्रकृतधातूपात्तक्रियाश्रयति
श्रवधित्वेनाविरुद्धत्वे · नत्वपरस्य रस्मात्मेयात्वपरस्य : इत्यत्र स्वधातुनागतिरूपसापुरानाटकमथानि
क्रागतिशतिपरस्याविश्लेषावधित्वमस्मत्रैव · मेषावधिकोयः एवं देशसंयोगलदनुकूलामेषाभिन्ना
श्रयकोवर्त्तमानोव्यापारः · पर्वतात्पततो ज्याम्पततिचेत्रः पर्वताभिन्नावधिकोधोदेशसंयोगा
नुकूलायोव्यापारस्तदाश्रयोऽश्वस्तदवधिकोधो देशसंयोगानुकूलएकचैत्राभिन्नाश्रयको
वर्त्तमानोव्यापारः · विश्लेषस्य क्वचिन्मानसत्वेऽपि क्वचिद्ध्याहृतयोऽपि · अधर्म्माज्जुगुप्सते साध्या
ह्रीयते इत्यादौ मानसाधर्म्मविश्लेषादाति · सरणक्रियापत्तविश्लेषयोरवधित्वस्त्वात् · इतिपञ्च
मी ॥ संबंधेषष्ठीति · एतास्सेवज्ञाविति प्रतीतिजनकः संबंधः तत्रषष्ठीत्यर्थः सचद्विविधः
क्रियाकारकसंबंधः द्रव्यगुणसंबंधश्चेति आद्यो द्विविधः सामान्यो विशेषश्च · विशेषः कर्म
त्वादिरूपस्तत्र द्वितीयादिरपवादः सामान्ये षष्ठी नचयथा · नटस्य शृणोति नटसंबंधिश्रवणा
नुकूलावर्त्तमानोव्यापारः विशेषेनतु नटेनगीयगीतस्य शृणोति · नटाभिन्नाश्रयायायोव्यापारस्तत्सा

राम
५८

धगीताभिन्नाश्रयं यत्नात्ननादितदनुकूलफलकाभिन्नाश्रयो वर्तमानो व्यापारः अत्वंददर्शयति·
राज्ञ इति राजसम्बन्धवान्पुरुष इत्यर्थः संबंधश्चात्र सेव्यसेवकरूपः एवमन्यत्राप्यूह्यं नन्वत्र संबंधस्या
मनिष्टत्वात् कस्मात्कथं षष्ठी एवं स्मात्तेनेति चेत्सत्यम् विशेषणस्याप्रधानत्वेन तन्न एव षष्ठी·
राज्ञः पुरुषः इत्यत्र राज्ञ इति प्रकृत्यर्थो विशेषणं पुरुषस्तु नार्थमात्रनिरूपक प्रतिपाद्यते· नाव
शेषत्वेन· यदि प्रवृत्तिर्न तदा षष्ठी भवत्येव· पुरुषस्य राजेति· तथापरार्थत्वान्निरूपणाद्यादप्रधा
ने विशेषणं विशेष्यं तु प्रधानं स्यात् स्वार्थस्य प्रकाशनादिति शुक्लः पट इत्यत्र तु अभेदविवक्षया
न षष्ठी· भेदविवक्षायामेव षष्ठीविधानात् राहोः शिर इत्यत्र तु सतोऽप्यभेदस्याविवक्षाय
षा· नु दराकल्पेभि भेदवैतावकल्पनः असतोऽप्यभेदस्य विवक्षा यथा· समुद्रः कुंडिका जलाधिक्यात्
कुंडिकायास्तु समुद्रत्वे प्रागल्भ्याभावस्तथा समुद्रस्यापि कुंडिकात्वं ॥ इति षष्ठी ॥ आधारे सप्तमीति·१
आध्रियते क्रियास्मिन्नित्याधारः कर्मकर्तृद्वारा क्रियाधारत्वं न तु साक्षात्· आधारस्य षड्विधत्व
माह· औपश्लेषिक इत्यादि उप उपरि श्लेषः संयोगः सोऽस्यास्तीति अत्र श्लेषो मत्वर्थे इतीकः गौणो
वैतिगित्वाहृद्दि· समीपभवं सामीपकं· केनैयकादितीकः अभिमतः सर्वतो व्याप्यते आधेयेर
नेति अभिव्यापकं सर्वदा भाति· कर्मशाध नेनात्वार्थकं· अष्टथकुदेशयराधाराधेययोः सर्वावर

यवसंबंधिकः विषयः प्रकाशनसामर्थ्येतदस्तीति पूर्ववत् प्रक्रिया॥ निमित्तंहेतुस्तत्रभवः फलंवास्त
दस्यास्तीतिवापूर्ववत्‌ अन्यत्रविद्यमानस्यसंबंधस्यान्यत्रारोपः उपचारः तत्रभवः सोऽस्यास्तीति
वौपचारिकः निमित्तादिप्रभेदाच्चतुर्विधः केश्चिदिष्यते॥ इतिवचनात्तस्यपदस्यापिप्रमाणयं उदा
हरणान्याह कटेशेतेकुमारोऽसौ एककटाभिन्नाश्रयकोनिद्रानुकूलएककुमाराभिन्नाश्रयः
कोवर्त्तमानोव्यापारः वटेगावःसुशेरते एववटाभिन्नाधारकनिद्रानुकूलोवहुगोभिन्नाधार
कवर्त्तमानोव्यापारः तिलेषुविद्यतेतैलं वहुतिलाभिन्नाधारकआत्मधारणानुकूलएकतैला
भिन्नाश्रयकोवर्त्तमानोव्यापारः हृदिब्रह्मामृतंपरम् विद्यतइतियोज्यं हृदयाभिन्नाश्रयकआ
त्मधारणानुकूलः स्फुरणानुकूलोवाएकब्रह्माभिन्नाश्रयकोव्यापारः अमृतंस्वरूपं मरणा
दन्यवापरंउत्तमं उपाधिशून्यमित्यर्थः हृदयमपिब्रह्मविषयकप्रकाशपरतासंबंधेनब्रह्मणः
सिविद्यते युद्धेसंनह्यतेधीरः युद्धाभिन्नाश्रयकः कवचसम्बंधानुकूलः एवंधीराभिन्नाश्रय
कोवर्त्तमानोव्यापारः कवचबंधनस्ययुद्धफलकत्वान्निमित्तम् अंगुल्यग्रेकरिणांशतं दि
ष्ठइत्युदाहरणं अंगुल्यग्राभिन्नाश्रयकः आत्मधारणानुकूलः करिसंबंधिशताभिन्नाश्रयको

वर्त्तमानो व्यापारः कर्तृकर्मणोराधाराधेयभागो गुणत्वेनाध्यारोप्यते । उपश्लेषत्यादिकं तु शब्दबोधेन भासते ।
अन्यपदोच्चारणात्तु भासते गोर्वाहीक इत्यत्रोपसर्जनत्ववत् भाव इति भवनं भावः भावः क्रियाभावोऽस्तीति मत्वर्थी
यश्च लक्ष्यते इति लक्षणा क्रियया लक्षणा क्रियालक्षणा बोधकमिति यावत् अप्रसिद्धक्रियाबोधिका याप्र
सिद्धक्रिया तद्वृत्तेः सप्तमीत्यर्थः वर्षति इत्यादि देशभिन्ना अधिका यावद्योगा क्रिया तयोपलक्षितमस्तेय
दागमनं तदा अथ अवार इत्यर्थः इतोन्यत्रार्थेऽपि सीयादिसिद्धये सेवा इत्यस्य योगविभागः कार्यः इति सप्तमी ॥
कारकविभक्तिं दर्शयित्वोपपदविभक्तिं दर्शयति विनासहत्यादिना विनाश्वसहश्च नमस्स्वस्ति अन्ये अनि हीरण
च स्वामी च तत्रारभ्यायाते इति हृदगर्भावित्यादि [illegible] यमाणत्वाद्दिशब्दः प्रत्येकं संबध्यते हीनो
याहीना वक्तव्य यथाक्रममन्वयः विनादियोग इति विनापापेशील पापसम्बन्धाविमर्शं मफलप्रदं भवतीत्यर्थः
द्वितीया च उपपदविभक्तयः अघ्न्यपवादे जपमनु इति हेतुभूतजपफला वृत्तिमनोति कालमेकाग्रयवर्षाण
इत्यर्थः उपहरिमिति हरे हीनामित्यर्थः न हीमिति नाचुसह संवह इत्यर्थः किन्तु वधने [illegible] अतिदेवानिति
देवानां पूज्य इत्यर्थः अभित इति उभयत इत्यर्थः धिगिति निर्भर्त्सननिन्दयोः उपरीति पर्वतस्यो
परिष्टात् समीपदेश इत्यर्थः अधीति समस्यापरिष्टात्समीपकाले इत्यर्थः [illegible] ग्रामस्या
धस्तात्समीपदेश इत्यर्थः कालाध्वनोरिति कालस्याध्वनश्च [illegible] कालाध्व [illegible] निर्गम [illegible]

स्मान्निरंतरं तस्यभावो नैरंतर्यं तस्मिन् क्रियागुणद्रव्यैः कालाध्वनो निरंतरसंबंधे कालाध्वभ्यां द्वि
तीया समासमिति निरंतरमाससंबंधिपक्वाश्रयाध्ययनानुकूलो व्यापारः मासंकल्याणीति · अव्य
वच्छिन्नमाससंबंधिनाभिन गुणावती मासगुडेति · अव्यवच्छिन्नमाससंबंद्धस्यत्वर्थे अभिनिरिति ने
रल्यस्वरत्वेन पूर्वनिपातकर्त्तव्ये विपरीतोच्चारणमीदृशसमुदायविवक्षार्थं तेनेदृन निविशते यदि
ह्यकर्मकावेपदेइति · अधिसत इत्यादि · अत्र नेयोगापलस्थितिः अवस्थान जन्यवैकुंठनिष्ठे
योगानुकूलएकदेशभिन्नाश्रयवर्त्तमानो व्यापार अभिनिविशतइति अभिनिवेशजन्यसन्मार्ग
भिन्नाश्रयकोयः संबंधस्तदनुकूलएकाश्रयावर्त्तमानो व्यापारः उपवसति इति · वैकुंठाभिन्ना
